Substance, country-made paper. 8×4 inches. Folia, 60. Lines, 9 on a page. Extent in ślokas, 750. Character, Nāgara. Date, Śaka 1728. Appearance, discoloured. Complete.

Colophon :—इत्याश्वलायनयजमानोपयोगि(गी)बौधायनदर्शपूर्णमास-प्रयोगः समाप्तः ।

Post Col. :—श्रीदुर्गायै नमः॥

शके १७२८ क्षयसंवत्सरे भाद्रपदवद्य ८ रविवासरे तद्दिने गण-पतिदैवज्ञस्य सूनु राजारामजोशीसेके करेण लिखितः ॥

स्वार्थं परोपकारार्थं च ॥

Beginning :—श्रीगणेशाय नमः ।

अथ दर्शपूर्णमासे (?) पौर्णमास्या उक्तान्वाधानदिने यजमानः प्रातरग्निहोत्रं हुत्वा केशश्मश्रुलोमनखानि वापयित्वा सपत्नीकः स्नात्वा कृतनवनीताभ्यञ्जनः कृताञ्जलिरेकविंशतिदर्भपिञ्जूलैः वपनं कुर्यात् । पत्न्यपि वपनाभ्यञ्जनवर्ज्जं सर्व्वं कुर्यात् । etc., etc.

730.

11231. **दर्शपूर्णमासप्रयोगः ।** *Darśa Pūrṇamāsaprayoga.*

Being intended for the follower of Baudhāyana.

Substance, country-made paper. 10×4½ inches. Folia, 43, Lines, 9 on a page. Extent in ślokas, 750. Character, Nagara of the nineteenth century. Appearance, fresh. Complete.

Beginning :—

अहिताग्निरन्वाधानदिने प्रातरग्निहोत्रं हुत्वा श्मश्रूपपक्षकेश-नखलोमानि वापयित्वा कृतस्नाननवनीताभ्यञ्जनांजनो हृतवासाः स्नातैः पत्न्यध्वर्य्वादिभिः सह प्रत्येकं सप्तभिः सप्तभिर्दर्भपिञ्जूलैर्मुखं नाभिं गुल्फौ च संमृज्य दर्भान् समुच्चित्य प्रोक्ष्योदङ् निरस्यति ॥ तत्पवनं । आपोहिष्ठेति तिसृभिस्त्रिरपः पिबेत् व्याहृतिभिर्मुख-मुन्मृजेत् । एतद्वापि परीतं तन्मन्त्राचमनम् ॥ etc., etc.

The end of the MS. :—ततोऽग्न्यर्चनादि ब्राह्मणतर्पणान्तं कुर्यात् । सन्तिष्ठते दर्शपूर्णमासप्रयोगः ।

सिगिपंतिं खोतमान अपि अन्यचेम ॥ श्रीलक्ष्मीव्यङ्कटेशविजया दुर्गापिश्चमस्तु ।

श्रीरस्तु पौर्णमासीयागः प्रतिपदः कर्त्तव्यः ॥

यजमान । अध्वर्यु । आग्नीध्र । ब्रह्मा ॥ होता ॥ श्रीराम० ॥ बौधायनीयप्रयोगो दर्शपूर्णमासप्रयोगः समाप्तः ॥

731.

28. **अग्न्याधाननिरूपणम् ।** *Agnyādhānanirūpana.*

The present MS. is noticed in L. 758.

At the right-hand upper corner of every leaf the letters

वौ. आ are written. Which abbreviate वौधायन आधान. But they may also abbreviate वौधायन आग्रयण and there are descriptions of Āgrayaṇa ceremonies also at the end. This treats both आधान and आग्रयन as in Baudh. II.

732.

92. **आधानप्रयोगः** or **आधानबौधायनः।** *Ādhyāna-prayoga or Ādhāna-Baudhāyana.*

This manuscript is noticed in L. 833.

Post Col. Statement:—

संवत् १८६६ शाके १७३१ चैत्रकृष्णापक्षे तिथौ ८ बुधवासरे इदं पुस्तकं लक्ष्मण मनोहरदीक्षित चौंयरी श्रीमोदेकरस्य इदं पुस्तकम् ॥ तैलाद्रक्षेदित्यादि ।

It is a Śrauta ceremony, which has nothing to do with "the Sacred Household Fire" as supposed by Rajendralāla. It refers to Pr. II of the Baudhāyana Śrauta sūttra.

733.

1905. **पुनराधेयप्रयोगः (बौधायनीयः)।** *Punaradheya-prayoga.*

For the manuscript and the work see L. 4178. The Col. says it belongs to Baudhāyana Sūttra.

Punarādheya is dealt with in the third praśna of Baudhāyana.

734.

2346. **आपूर्व्विकविधिः।** *Āpūrvikavidhi.*

For the manuscript see L. 4051 which describes it under the above title.

The beginning quoted in L. 4051 is that portion of the Baūdhāyana Kalpa Sūttra, which treats of Darvīhoma. It ends in 2B, with the following words:—

नांत्वा घृतस्य धारयाग्नौ संराधनि यजे स्वाहा। संराधन्यै देव्यै

स्वाहा प्रसाधन्यै देव्यै स्वाहा भूः स्वाहा भुवः स्वाहा सुवः स्वाहा भूर्भुवः स्वः स्वाहेति एतावत् सर्व्वदर्व्वीहोमानामेष कल्पः ॥ ५ ॥

These two leaves have the letters बौ. सू. in their left-hand upper corner.

Then begins a series of Kārikās on the above.

The beginning of the kārikās in 2A :—

राम ॥ अथ प्रकृतयस्तास (?) दर्व्विहोमेषु सर्व्वशः ।
आघारवच्चिष्कृवत् सुयचेचरुमिति श्रुतिः ॥
तासां प्रयोग आदौ तु स्नात्वागत्वाहृताम्बरः ।
आत्मानं दर्भपिञ्जूलैः पावयेत् सप्तकैस्त्रिभिः ॥

5B. इत्याघारप्रकृतिरष्टमोऽध्यायः ।

5B. अथापरश्चमिद्धार्थं (र्मं) पर्युक्ष्यास्तीर्य दर्भगैः ।
आज्यस्थालीं स्रुवं चैव स्रुचं च समिधं तथा ।
प्रोक्षणीं बर्हिषश्चेति कूर्चे पात्राणि सादयेत् ॥

For the end of Āpūrvavidhi see L. 4051, referred to above.

6B. इत्यापूर्व्विकविधिः समाप्तः । (See our Catal. No. 793.) After this there are 8 lines describing the size and the measure of Darvī.

इति होमदर्व्वीप्रमाणमिति ह स्माह बौधायनः ।

735.

1901. **पशुबन्धप्रयोगः ।** *Paśubandhaprayoga.*

A treatise on animal sacrifices.

For the manuscript and the work see L. 4177.

See CS. No. 288 and W. 1452, where it is called Nirudha Paśubandha prayoga. In Weber 1452 it is said to belong to Baudhāyana's School. The subject is dealt with in P. IV of Baudhāyana.

The use of the parts of the sacrificed animal is stated below :—

15B. प्रतिप्रस्थाता गुदतृतीयभागं वसाहोमहवनीं चादाय होतुरुत्तरपार्श्वे उपविश्य गुदं प्रत्यनुयाजं सधितिना असम्भिन्दन् प्रच्छिद्य वसाहोमहवन्यां अपर्य्यावृत्य जुहोति ।

14B. अथ दक्षिणस्य पार्श्वस्य मांसवत्प्रदेशेन वसाहोमहवन्यां गृहीतां वसां मिश्रयति ... ... यथाहृतं जाघनीं प्रत्याहृत्य पश्चान्नीत्वा शालामुखीयस्य समीपे निदध्युः । पशुं जिह्वादिपञ्चकं च यथाहृतं पर्य्याहृत्य यथास्थानं निदध्युः ।

736.

2052. *The Same.*

Substance, country-made paper. $8\frac{1}{4} \times 4$ inches. Folia, 25. Lines, 11 on a page. Extent in ślokas, 400. Character, Nāgara. Date, Śaka 1615. Appearance, old. Complete.

Colophon:—

निरूढपशुबन्धप्रयोगः समाप्तः ॥

Post. Col.:—

शके १६१५ विजयनाम ज्येष्ठशुद्ध १० तद्दिने इदं पुस्तकं भागवतोपनामकमोरेश्वरदीक्षितेन लिखितम् ।

737.

1455. **पशुबन्धप्रयोगः ।** *Paśubandhaprayoga.*

Substance, country-made yellow paper. $11 \times 4\frac{1}{2}$ inches. Pages, 28. Lines, 8. Extent in ślokas, 475 according to the scribes statement. Character, Bengali. Date, Śaka 1800. Appearance, fresh. Prose. Generally correct. Complete.

For the beginning and the end of the work see C.S. 287, Vol. I.

The mantras cited in this work are identical with those in the 4th praśna of Baudhāyana Kalpā sūttra. (See Caland's edition of the text). It does not belong to Āśvalāyana's School, as stated in C.S. 287, referred to above, because Āśvalāyana gives only a few mantras for Hotṛ priest in Paśubandha.

738.

2114. **अग्निष्टोमप्रयोगः ।** *Agniṣṭomaprayoga.*

By Govinda Śeṣa, son of Yājñeśvara Śeṣa.

Substance, county-made paper. 8×4 inches. Folia, 138. Lines, on a page, 9, 10, 11. Extent in ślokas, 2450. Character, Nagar. Date, Śaka, 1723. Appearance, fresh. Complete.

Colophon :—सन्तिष्ठते अग्निष्टोमः ।

Post Col. :—शके १७२३ दुर्म्मतिनामसंवत्सरे दक्षिणायने भाद्रकृष्णात्रयोदश्यौ इन्दुवासरे तद्दिने सहस्रबुद्धोपनामकमहादेवेन लिखितं श्रीसिद्धेश्वरार्पणमस्तु etc., etc., पुण्यग्रामे लिखितम् ।

For a description of the work see Weber 1453.

The last verse and the Colophon as given by Weber are not found in the manuscript.

The work belongs to Baudhāyana School, and follows Baudhāyana in due order. (P. VI—VIII.)

739.

2302. **अग्निष्टोमोपोद्घात ।** *Agniṣṭomopodghāta.*

By Rāmacandra Dīkṣita Draviḍa.

Substance, country-made paper. 9½×5½ inches. Folia, 9. Lines on a page, 10 to 11. Extent in ślokas, 200. Character, Nāgar. Appearance, discoloured. Complete.

Col. :—इति श्रीमद्द्रविड़रामचन्द्रदीक्षितकृतोऽग्निष्टोमोपोद्घातः ।

Post Col. :—हे पुस्तक नानादिक्षितभागवतयाँचे असे हस्ताक्षर सदाशिवभट्ट सप्रेसातारकर । श्री—

It begins :—वामर्थाविव etc., etc.

उक्ता हविर्यज्ञा अग्न्याधेयपूर्व्वका नित्याः । इदानीं नित्यत्वसामान्यात् सर्व्वेषामेकाहाहीनसत्राणां मूलप्रकृतित्वात् प्रथमानुष्ठेयत्वाच्चाग्निष्टोम उच्यते । अग्निष्टोमेन यक्ष्यमाणो भवतीति (Baudh. VI. 1) अग्निष्टोमशब्दोयं सोमयागाङ्गस्तोत्रेषु द्वादशस्तोत्रे रूढ़ः । तथाहि ताण्ड्यब्राह्मणे स्तोमविभाजके त्रिवृत् बहि-

ष्पवमानं पञ्चदशान्याज्यानि पञ्चदशो माध्यन्दिनः पवमानः। सप्तदशानि पृष्ठानि सप्तदश आर्भव एकविंशोऽग्निष्टोमः इति वाक्ये तस्यैव स्तोत्रस्यानुवादेनैकविंशस्तोमविधानात्॥ बृहदग्निष्टोमसामविरासु वामदेव्यमग्निष्टोमसामेत्याद्युत्तरक्रतुषु तथैव दर्शनात्। अग्नेर्दैवतायाः स्तोमः स्तोत्रं गुणकीर्त्तनमग्निष्टोमः। यज्ञायज्ञावो अग्नय इत्यादि।

740.

479. **बौधायनसोमप्रयोगः।** *Baudhāyana Somaprayoga.*

For a description of this manuscript see L. 1335.

741.

300. **सोमप्रयोग (बौधायनीयः)।** *Somaprayoga according to Baudhāyana.*

Substance, country-made paper. 9×4 inches. Folia, 174. Lines, 9 on a page. Extent in ślokas, 3232. Character, Nāgara. Appearance, tolerable. Incomplete at the end.

See L. 16.

This ritual is intended for one belonging to the Āśvalāyana School, who chooses to perform the soma sacrifice according to the rules prescribed by Baudhāyana. It is in the main a work of the Baudhāyana śakhā, modified so far as to suit the sacrificer of the Āśvalāyana School.

Every leaf has on the left-hand upper corner, **बो. सो.** as indicating the name of the ritual and on the right-hand lower corner, **हेरम्ब.**

The authorities quoted: (1) Kalpasāra (19B); (2) Āśvalāyana, 26 A; (3) Deva Svāmī, 34B; (4) Keśava Svāmī, 46B; (5) Sāyaṇācārya, 82A; (6) Yajñatantra, 90B; (7) Gopāla, 98A; (8) Chandoga sūtra, 103B; (9) Addhvaryu sūtra, 103B; (10) Vṛttikṛt, 107A; (11) Kātyāyana, 108A; (12) Keśava, 111A; (13) Deva Svāmī, 111B; (14) Baudhāyana, 121B.

742.

2097. सोमभक्षः (बौधायनीयः)। *Somabhakṣa according to Baudhāyana.*

Substance, country-made paper. 8×3¾ inches. Folia, 5. Lines, 8, 9, 10, 11 on a page. Extent in ślokas, 80. Character, Nagar. Appearance, discoloured.

It begins :—

अथ बौधायनानुसारेण सोमभक्षो निरूप्यते। तत्र भक्षणे त्रीणि निमित्तानि वषट्कारो होमाभिषवः समाख्या च। तत्र होत्रादयः वषट्कारकर्त्तारः, अध्वर्य्वादयस्तु होमाभिषवकर्त्तारः, चमसिता तु होत्रादीनां दशानां। सदस्यचमसपक्षे तस्यापि। यत्र एकस्मिन् काले एकस्मिन् पात्रे द्वयोर्बहूनां वा भक्षणमुपपद्यते तत्र परस्परं उपहूयं भक्षयन्ति। यत्र तु एक एव भक्षयति ता (?) तत्र नारायणवृत्त्यनुसारेण अध्वर्य्यवो रुपह्वः (?)। आदित्यसावित्र्यग्रहयोरुद्गातृचमसस्य भक्ष एव नास्ति। ततः प्रातःसवने ऐन्द्रवायवपात्रे द्वौ भक्षणपर्य्यायौ। तत्र वषट्कर्त्तुः प्राथम्यात्। होता प्रथमे पर्य्याये अध्वर्युर्द्वितीये पर्य्याये।

It ends :—ततोऽध्वर्य्वादयस्तु उन्नेतारमुपहूय भक्षयन्ति। इति तृतीयं सवनम्॥

743.

3010. *The Same.*

Substance, country-made paper. 9½×4 inches. Folia, 4. Lines, 9, 10 on a page. Extent in ślokas, 100. Character, Nāgara. Date, Śaka 1700. Appearance, discoloured. Complete.

Colophon :—इति बौधायनीयानां सोमभक्षः।

The Post Colophon Statement :—

शके १७०० विलंवी वैशा —

744.

1038. **बौधायनीयपौण्डरीकप्रयोगः ।** *Baudhāyanīya Paundarīkaprayoga.*

Substance, country-made paper. $9\frac{3}{4} \times 4\frac{1}{4}$ inches. Folia, 25. Lines, 9 to 11 on a page. Extent in ślokas, 500. Character, Nagar. Appearance, old. Complete.

A manual for the performance of 'Pauṇḍarika' rite in accordance with Baudhāyana ritual.

Beginning :—

श्रीगणेशाय नमः ।

अथ बौधायनपौण्डरीकस्य प्रयोगः । तत्र सूत्रं तस्याह्नान्यभ्या-संग्यः षड्हः स्वपस्कन्दो मादप्रममह्नरयातिरात्र इति ।

It ends thus :—

... स्वगाक्कतामह्वं यजमानायतिष्ठत । ततः पत्नीशान्तय ......
वतं यूपपसु[मु]पतिष्ठते आशासानः क्कतो॰मतिष्ठ । इत्यनूहेन दैवो
भेदात् । ... ... क्कतिवत् इति यूपैकानीलाष्टपशास्वप्रयोगः ।

Col. :—इति पौण्डरीकयाजि + समाप्तोऽयं ग्रन्थः ॥

Post Col. :—इति बौधायनीयानां प्रयोगः पौण्डरीयकः ।
तोरोप[नाम]सिंहस्य पुस्तकं तु सतां मुदे ॥

The last three leaves are in a dilapidated condition.

745.

1950. **प्रायश्चित्तप्रदीपः ।** *Prāyaścittapradīpa.*

By an anonymous writer of Baudhāyana's School.

Substance, country-made paper. $9 \times 3\frac{1}{2}$ inches. Folia, 86. Lines, 10 on a page. Extent in ślokas, 1700. Character, Nāgara of the 18th century. Complete. Appearance, discoloured and fragile.

The last Colophon :—

इत्याधानादिसोमान्तप्रायश्चित्तानि ।

Post Colophon :—

इंगळ्ळोपनाम्ना सखारामेण लिखितमिदं ॥ शुभं भवतु । यज्ञेश्वर-
भट्टस्येदं । श्रीकृष्णार्पणमस्तु ।

For a full description of the work which is based on Bhāvasvāmi's commentary and the Sūttrabhāṣya of Gopāla, see I.O. Catal. No. 449. Rājendralāla attributes this to Gopāla in L. 32. See Infra.

746.

1677. *The Same.*

Substance, country-made paper. 10¼×4 inches. Folia, 115 of which leaves 83—86 are restored in a different handwriting. Lines, 8 on a page. Extent in ślokas, 2600. Character, Nagar. Appearance, tolerable. Complete.

The beginning and object of the work :—

नत्वा बौधायनाचार्य्यं तेनोक्तश्रौतकर्म्मणाम् ।
विध्यतिक्रमजप्रायश्चित्तदीपः प्रकाश्यते ॥

Authorities consulted :—

श्रौते बौधायनोक्तानि प्रायश्चित्तानि यानि तु ।
उक्तानि सूत्रभाष्ये च वर्यगोपालसूरिणा ॥
व्यासोक्तानि प्रकीर्णानि तैरनुक्तानि यानि च ।
भवस्वामिमतात्तेषां विस्तरात् निर्णयं ब्रुवे ॥

Sections into which the work is divided :—

पञ्चप्रकरणान्यत्र तेष्वाधानाग्निहोत्रके ।
दर्शाद्याग्रयणाद्यत्र सोमश्चेति यथाक्रमम् ॥

The last Colophon :—

इति प्रायश्चित्तप्रदीपे सोमप्रायश्चित्तंनाम प्रकरणं ॥
ग्रन्थः सम्पूर्णः ॥

Post Col. :—

वीरेश । ... रत्नीय तालपत्रानुसारतः ।
प्रायश्चित्तप्रदीपोऽयं लिखितः कदलीकरैः ॥
ग्रन्थसंख्या २६०० । शिवम् ।

See also Bik. No. 313. (P. 137.)

Both Rajendralall and Aufrecht attribute the work to Gopāla Suri. The author's name is nowhere mentioned, and in the beginning the author simply mentioned the commentary of Gopāla Sūri on 'Baudhāyana Kalpasūtra' as one of his authorities Rajendralall took this for the name of the author.

This is a compendium for expiations for accidental irregularities in the performance of the 'Adhana, Agnihotra, Darsapaurnamāsa, Āgrayana, and soma sacrifices according to Baudhāyana. The author professes to belong to the school of 'Bhavasvāmin.'

746A.

2468. *The Same.*

Substance, country-made paper. 12¼×5 inches. Folia, 23. Lines, 9 on a page. Extent in ślokas, 530. Character, Nāgara. Date, Śaka 1711. Appearance, fresh.

The Colophons :—

1B. इति प्रायश्चित्तप्रदीपे आग्रयणाद्यं नाम चतुर्थं प्रकरणम् ।

23B. इति प्रायश्चित्तप्रदीपे सोमप्रायश्चित्तं नाम पञ्चमं प्रकरणम् ।

This is the last chapter of Prāyaścittapradipa.

The date of the MS. :—

शशाद्रिरूपके शाके मासे प्रौष्ठपदेऽसिते ।
तिथौ दश रवौ वारे वैजनाथेन लेखिते ॥

747.

1929. **प्रायश्चित्ताधानम्** or **विच्छिन्नाधानम् ।** *Prāyaścittādhāna or Vicchinnādhāna.*

Substance, country-made paper. 9×4 inches. Folia, 4. Lines, 8 on a page. Extent in ślokas, 60. Character, Nāgara. Appearance, old and faded. Complete. Incorrect.

On expiation for the discontinuation of the sacrificial fire and its restoration according to Baudhāyana.

It begins :—

श्रीगणेशाय नमः। अथ प्रायश्चित्ताधानम् ॥

तत्र सर्व्वाग्निनाशे समारूढ़ारणिनाशाद्यग्निलौकिकत्वे च पुनराधेयं तत्र तत्र विच्छिन्नाग्नेः समारूढ़ेषु नष्टारणिकस्य च कालो अनवेक्ष्य इति प्रायश्चित्तप्रदीपोक्तेर्विच्छिन्नाधाने न नक्षत्रादि-नियम इत्यापस्तम्बीयाग्निलायां (?) प्रायश्चित्तार्थमाधानं कर्त्तव्यं मासमात्रतन्त्रम्। नर्तुनक्षत्रपर्व्वेच्छानिमित्तानन्तरं हि तत् ॥

आनन्तरमतिक्रम्य यद्वा कालान्तरे पुनः।
आधीयते यदा पूर्व्वोक्तत्वन्तं सर्व्वचित्तकम् ॥
सर्व्वचित्तकं सर्व्वप्रायश्चित्तं समस्तव्याहृतिभिः।

The authorities consulted :—

1A, प्रायश्चित्तप्रदीप ; अग्निला 1B, कात्यायनकारिका ; 3B. बौधा-यनसूत्र।

It ends :—

इत्येतद्विच्छिन्नाधाने मेन्तमेव (?) प्रायश्चित्ताधानम्। इति विच्छिन्नाधानं समाप्तम्।

748.

2215. **कौकिली सौत्रामणीप्रयोग।** *Kaukilī Sauttrāmaṇi-prayoga.*

According to Baudhāyana, *by Bhairava.*

Substance, country-made paper. 9 × 4¼ inches. Folia, 15. Lines on a page, 11. Extent in Ślokas, 400. Character, Nāgara. Date, Śaka 1753, Saṃvata 1888. Fresh. Complete.

Colophon :— इति बौधायनीयभैरवकृतकौकिलीसौत्रमण्याः प्रयोगः ॥

Post Col. :—प्रत्यन्तरे,—

शमितहृदयानि जिह्वावक्षांसि तानि सार्द्धं ० दक्षिणादोषाणि सव्वा श्रोणीरणिमुन्तिमसुदानां तानि तानि त्र्यङ्गाणि कुरुतात् श्वनिर्धुक्ष आयनीधावप्रत्तावङ्कयूमः कुरुतात्स्विष्टिः पशून् प्रच्यावय-तात्स्विष्टिः पशूनां पशूनां हृदयान्युमानि कुरुतात् ॥

भग्नपृष्ठि etc., शके १७५३ संवत् १८८८ शुभकृतनाम संवत्सरे माघशु० १० शनौ इदं पुस्तकं भागवतोपनामनारायणदीक्षितेन लिखितं ॥ मंगमत् ॥ श्रीविश्वेश्वरार्पणं ।

The work begins:—

नत्वा शिवपदाम्भोजं कुर्वे बौधायनानुगम् ।
सौत्रामण्यास्तु कौकिल्याः प्रयोगं भैरवाह्वयः ॥

तत्र राजसूयवत् सौत्रामणीत्यत केचित्तु (?) ग्रहहोमपितृयज्ञादिसमुदायात्मककर्म्मनामधेयं । सा द्विविधा । कौकिलीत्येका चरकेत्यपरा । सर्व्वापि हविर्यज्ञसंस्थान्तर्गतत्वात् नित्या । एतया अन्नाद्यकामो यजेत सर्गकामश्चेत्यादिना फलश्रवणात् काम्या । बार्हस्पत्यं पशुं चतुर्थं यदि सामातिपचितो भवतीत्यादिना नैमित्तिकत्वमपि । तयोः स्वतन्त्रा कौकिली । अपत्नीकस्य असोमपस्यापि इयमेव । यजेत् सौत्रमण्यामपत्नीकोऽपि असोमपः इत्यैतरेयब्राह्मणोक्तेः । अग्निं चित्वा सौत्रामण्या यजेत इत्यादौ अङ्गत्वेन श्रूयमाणा चरकैव । तत्र कौकिल्या आचार्य्योक्तकल्पस्य उत्सन्नत्वात् आपस्तम्बकल्पोक्तं विशेषमाश्रित्य स्वाविरोधेन प्रयोगो रच्यते । अनुक्ते चरकातिदेशः । तस्योदगयन आपूर्य्यमाणपक्षे देवनक्षत्रे पर्व्वणि वा इत्यादिपशुकाल एव कालः । पर्व्वणि यथा त्रिपशुः सम्पद्यते तथा द्वादश्यां नान्दीश्राद्धोदकशान्तिप्रतिसरबन्धादि कृत्वा त्रयोदश्यां ऐन्द्रपशुना आदित्यचरुणा च प्रचर्य्य चतुर्दश्यां त्रिपशूपवसथं कृत्वा पर्व्वणि त्रिपशुं अवभृथं महापितृयज्ञं च समाप्य प्रतिपदि वायोधसेन पशुना आदित्येन चरुणा च प्रचर्य्य समापयेत् । चयनं चिकीर्षति यदि तदा त्रिपशौ कार्य्यं नान्यत्र पशौ । तयोरङ्गत्वात् समप्रधानपक्षे भवत्येव । असम्भवे पितृयज्ञोऽपि परदिने । त्र्यहे पुरस्तादिति वचनं सुरासन्धानकरणपक्षे नवम्यां आरम्भपरं । यद्यपि सुरोद्धेषेण भक्ष्यस्य एव निषेधो नतु स्वाद्वींत्वेत्यादिसुरासन्धानकरणादेस्तथापि कल्पोक्तसन्धानप्रकारस्य आद्यत्वे उत्सन्नत्वात् लोकविद्विष्टत्वात् पयोग्रहा वा स्युरित्यापस्तम्बवचनाच्च मुख्यसुराकल्पमुपेक्ष्य पयोग्रहपक्षाश्रयणं कार्य्यम् ।

2B. अथ प्रयोगः पूर्व्वेद्युः नान्दीमुखादि श्वः स्नानादिचतुष्ट-यान्ते पुण्याहं वाचयित्वा पश्चाद् गार्हपत्यस्येत्यादिनिविष्ठमित्यन्ते श्रीपरमेश्वरप्रीत्यर्थं कामकौकिल्या सौत्रामण्या यक्ष्ये। इति विद्य-मांसु विद्वद्भिः संकल्प्य पश्चात्तष्टष्ठान् ऋत्विजो वृत्वा अर्हयित्वा ईडादेवहविरित्यादि अन्वारम्भणीयां कृत्वा वारण्योरग्नीन् समारोप्य अवदैः वेदि[म]वसाय मथित्वा मनस्वतीं कृत्वा अकृत्वा वा साग्नि-चित्येयाः पुरस्तादित्यादि स्वर्गकाम आत्मकेतुकं अग्निं चेष्ये इति संकल्पयेत्। यं चेष्यमक्तं वा संकल्पः। पुन र्याः पुरस्तादित्यादि यमेन्द्रेण पशुना यक्ष्ये इति पशुं संकल्प्य विहृत्य षड्होता ट? कृष्माण्डादिसारस्वतहोमाः सर्व्वपश्वर्थमादावेव सकृत्।

It ends:—पूर्णाहुत्यन्तं पुनराधानवर्ज्जं समाप्य तदानीमेव विहृत्य आदित्येष्टिः पूर्व्ववत्। पूर्व्वदत्तवत्समातरं गां ददाति। पुनराधानवर्ज्जं ब्राह्मणतर्पणान्तं कृत्वा अग्नीन् समारोप्य स्वानि अग्न्यायतनानि अध्वस्य मथित्वा अग्नीन् विहृत्य अग्निहोत्रं जुहु-यात्। सन्तिष्ठते कौकिलीसौत्रामणी तया स्वर्गकामो यजते। पश्वश्रुतब्राह्मणा भोज्याः।

This is to be differentiated from L. 4246 which belongs to the Āsvalāyana School.

749.

2121. **मित्रविन्देष्टि।** *Mitravindeṣṭi of the Baudhāyana School.*

Substance, country-made paper. $8\frac{1}{4} \times 4\frac{1}{4}$ inches. Folia, 6. Lines, 8 on a page. Extent in slokas, 100. Character, Nāgara of the eighteenth century. Appearance, discoloured. Complete.

Mitravindeṣṭi of Baudhāyana's School takes up 5 pages. Then there is the Kātyāyana Sūtra about Mitravindeṣṭi.

The Iṣṭis are treated of in P. XIII of Baudhāyana.

(1) अथ बौधायनानां मित्रविन्देष्टिः। सा च पर्व्वणि कार्य्या। खण्डपर्व्वणि तु प्रक्रमणानन्तरं सद्य एव। अखण्डपर्व्वण्यपि पूर्व्वेद्युरेव विकृतिं कृत्वा प्रकृत्यन्वाधानं

कार्य्यमित्युक्तं तन्त्ररत्ने। उदगयन आपूर्य्यमाणपक्षे कृत्तिकादिविशाखान्तेषु देवनक्षत्रेषु रेवत्यां वा कार्य्या। दक्षिणायनेपि कार्य्या। प्रथमप्रयोगे अन्वारम्भणीया कार्य्या। इत्तिकारस्तु नेत्याह। शुद्धकाला सद्यस्काला वा पूर्व्वेद्युः पूर्व्वाह्णे वृद्धिश्राद्धं कृत्वा रात्रावुदकशान्तिं प्रतिसरबन्धञ्च कुर्य्यात्। श्वोभूते प्रातरग्निहोत्रं कृत्वा यजमानः स्नानवपनमन्त्राचमनमन्त्रप्रोक्षणानि कुर्य्यात् पुण्याहे अग्न्यादयः प्रीयन्तामिति विशेषः। ऋत्विजः स्नानादिचतुष्टयं कुर्य्यात् गार्हपत्यस्य पश्चात् प्राक्कूलनान् दर्भान् आस्तीर्य्य तेषु प्राङ्मुखो यजमान उपविशति॥ याः पुरस्तादित्यादि श्रीपरमेश्वरप्रीत्यर्थं श्रीकामो वा, राष्ट्रकामो वा, मित्रकामो वा, अयुष्कामो वा, ईश्वरप्रीतिकामो वा, मित्रविन्दया महावैराजेष्ट्या यक्ष्ये। इति मनसा त्रिः संकल्प्य त्रिरुच्चैः तन्मरु ॐ तथेत्यन्तमुक्त्वा मित्रविन्दा महावैराजेष्टिसम्बन्धि हविः व्रीहिमयाः पुरोडाशाः व्रीहिमयाश्चरवः। पञ्चप्रयाजाः अग्नीषोमावाज्यभागौ अग्निः सोमो वरुणो मित्र इन्द्रो बृहस्पतिसविता पूषा सरस्वतीत्यष्टौ इति प्रधानादेवताः। देवा आज्यपाः। अग्निः स्विष्टकृत्।

(2) The Kātyāyana Sūtras for Mitravinda are to be found at the end of the fifth chapter of the Kātīya Śrauta Sūtras.

See L. 1572 and C.S. 427 for slightly different processes for the performance of the Mitravindā iṣṭiḥ.

750.

766. मित्रविन्देष्टिः। *Mitravindeṣṭi.*

For the manuscript see L. 1572.

751.

2128. मित्रविन्देष्टिः। *Mitravindeṣṭi.*

Substance, country-made paper. $8\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 4. Lines on a page, 10. Extent in ślokas, 50. Character, Nāgara of the eighteenth century. Appearance, discoloured. Complete.

This is slightly different from the two previous numbers.

It begins and ends, as in our Catal. No. 750 or L. 1572. But it differs a good deal in detail. In the other MS. it is described as a Mahāvairajīṣṭiḥ, but not so in this.

Performance of 'Mitravindesti' gives the performer many friends and prosperity.

752.
6279.

Substance, country-made paper. × inches. Folia, 4. Lines, 16 per page. Character, modern Nāgara. Appearance, fresh. Incomplete at the end.

We have only on the top of the second and the fourth leaves—the name उत्सर्गेष्टिः—उत्स on one side र्गेष्टिः on the other.

It relates to the re-consecration of the sacred fires.

Beginning :—श्रीगणेशाय नमः। अथाहिताग्निविषये विशेषः।

तत्र श्रौताग्नयश्चेदिच्छिन्नाश्चेत् पुनराधानमिष्ट्यंतं पूर्णाहुत्यंतं वा कृत्वा प्रायश्चित्तादि कुर्य्यात्। विधुरोऽग्निहोत्री तु पूर्व्वमेव चिका-ग्रहमखंडनोक्तरीत्या कुशपत्न्या सह पावमानेष्ट्यंतं पूर्णाहुत्यंतं वाधानं कृत्वा कुर्य्यात्। तथा भार्य्यायां मृतायां तया सह वह्निषु गतेषु सोऽपि विधुराग्निः मखंडनोक्तरीत्या एकाकी पावमानेष्ट्यंतं पूर्णा-हुत्यंतं वाधानं पूर्व्वमेव कृत्वा पूर्व्वोक्तकाले प्रायश्चित्तं कृत्वा पर्व्वणि प्राजापत्या स्यात्तत्पूर्व्वमष्टौ (?) श्राद्धमपि कृत्वा पुण्याहवाचनादि-सावित्रीप्रवेशान्तं पूर्व्वरीत्या कृत्वा काले ब्रह्मान्वाधानं कुर्य्यात्— तत्र प्रकारः ... ... ततः प्रतिपदि ब्राह्मे मुहूर्त्ते उत्थाय ... ... वैश्वानरीं प्राजापत्यां च कुर्य्यात्। तत्र वैश्वानर्य्याः प्राजापत्याः समानतन्त्रप्रयोगाः।

2B.—तत्रयोमद्ध ब्रह्मानन्दपद्धतावत्रगन्तव्यः। अथ बौधायनानुसारी वैश्वानरेष्टिप्रयोगः।

3B.—इति वैश्वानरेष्टिः। अथ प्राजापत्यः।

The second portion ends abruptly.

753.

6287. **मृगारिष्टेः प्रयोगः।** *Mrgāreṣṭeḥ prayogaḥ.*

Substance, country-made paper. 10×4⅓ inches. Folia, 11. Lines, 12 per page. Extent in ślokas, 300. Character, Nāgara. Copied in Saṃvat 1862. Appearance, old and discoloured. Complete.

Beginning :—

श्रीगणेशाय नमः।

अथ कात्यायनानुसारेण बौधायनसूत्रविहितमृगारिष्टेः प्रयोगः। सा च पवित्रेष्टिवत्—न विशेषः। तत्र प्रथमप्रयोगे मासश्राद्धं कुर्यात्। अन्वारम्भणीया च। पुनः खरस्थाने भूसंस्कारः। मृगारेष्ट्यर्थं गार्हपत्यादाहवनीयदक्षिणाग्निमाहरामि।

Saṃkalpa runs :—

देशकालौ संकीर्त्य यक्ष्माद्यन्यतमरोगनिवृत्तिपूर्व्वक-आगरातो (?) निर्बर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं मृगारेष्ट्याहं यक्ष्ये— इति संकल्पः।

End :—इति दशहविर्मृगारेष्टिः संतिष्ठते।

Post Col. :—संवत् १८६२ मिति कार्त्तिक शुक्ल ६।

754.

6309.

Substance, country-made paper. 8×5 inches. Folia, 4—8. Lines, 10 per page. Extent in ślokas, 70. Character, modern Nāgara. Appearance, fresh.

I.

6A.—इति वैश्वानरेष्टिः।

Beginning :—अथ बौधायनानुसारी वैश्वानरेष्टिप्रयोगः।

देशकालौ संकीर्त्य सन्न्यासाङ्गवैश्वानरेष्ट्यधिकारार्थं वपन-मन्त्राचमनमन्त्रप्रोक्षणपुण्याहवाचनानि करिष्ये इति संकल्प्य ऋत्वि-जोऽपि सन्न्यासाङ्गवैश्वानरेष्ट्यार्त्विज्याधिकारार्थं वपनमन्त्राचमन मन्त्रप्रोक्षणानि करिष्ये इति संकल्प्य ... ... etc., etc.

II.

7A.—इति प्राजापत्येष्टिः—

Beginning 6A :—अथ प्राजापत्यः। पूर्व्ववत् त्रिरुपांशु त्रिरुच्चै प्राजापत्येष्ट्या यक्ष्य इति संकल्प्य ... ... etc., etc.

III. (Last work).

Colophon :—इति त्रेताग्निकर्त्तृकं प्रतिप्रयोगः।

Beginning : 7A—एवं प्राजापत्याद्यन्यतमामिष्टिं कृत्वा अर्द्धाधानिना औपासनाग्नौ सर्व्वाधानिना दक्षिणाग्नौ प्राणादिहोमपूर्व्वकं विरजाहोमं पुरुषसूक्तहोमं च अनाहिताग्निलिखितेन प्रकारेण तदङ्गैः दक्षिणादानान्तं कृत्वा अर्द्धाधानिना औपासनाग्नेः समाप्तिं च त्विति उपस्थानं कुर्य्यात्।

755.

2122. दिग्विजयेष्टि। *Digvijayeṣṭi.*

For the manuscript and the work see L. 4250.

Cat. Cat. says this belongs to Baudhāyana Sūtra.

दिग्विजयेष्टि ends at the end of 4*a*. 4*b* commences with अथ हौत्रं and the new work begins in the usual way of Haūtra works: नमः प्रवक्त्रे इत्यादि सप्तदशसमिधेन्यः।

The Hautra work ends in line 3 leaf 6.

This Hautra is connected with the Digvijayesti. After

इति हौत्रं समाप्तं अस्यामिष्टौ याज्युष्य एव याज्यानुवाक्याः।
नर्व्वे दिक्षुः दिग्वतीर्याज्यानुवाक्याः
भवन्तीति प्रत्यक्षश्रुतिविधानात्।

स्मारेष्टिवत्। आश्वलायनानान्तु वैश्वानरीयं नवमं कार्यं दशमं। उत्तमप्रयाजे वेर् यजामहे स्वा०स्वाहाग्निं गायत्रं त्रिवृतं राथन्तरं वासन्तिकं स्वाहेन्द्रं त्रैष्टुभं पञ्चदशं वार्हतं ग्रैष्मं स्वाहा विश्वान् देवान् जागतान् सप्तदशान् वैरूपान् वार्षिकान् स्वाहा मित्रावरुणावानुष्टुभावेकविंशौ विराजौ सारदौ स्वाहा बृहस्पतिं

पाङ्क्तं त्रिणवं शाक्वरं हैमन्तिकं स्वाहासवितारमातिच्छन्दसं त्रय-स्त्रिंशं रैवतं शैशिरं स्वाहादितिं विष्णुपत्नीं स्वाहाग्निं वैश्वानरं स्वाहानुमतिं स्वाहा कं उ० स्वाहा उ० देवा आज्यपा जुषाणा अग्न आज्यस्य व्यन्तु वौ३ ।

Post Col. :—इदं पुस्तकं भागवतोपनाम्ना यज्ञेश्वरेण लिखितं स्वार्थं परोपकारार्थञ्च ।

On the obverse of leaf 1 we have सर्व्वपृष्ठेष्टिप्रारम्भः. On the reverse of leaf 6, we have सर्व्वपृष्ठेष्टिसमाप्तम् ।

In leaf 2 the सङ्कल्प of सर्व्वपृष्ठेष्टि is given in the following terms:—

स्नानादिपञ्चकं कृत्वा याः पुरस्तात् इत्यादिदिग्विजयकामः पाप-निर्णोदकामः सर्वदिक्षु पुण्यकीर्त्तिकामोऽन्नाद्यकामो वा सर्वपृष्ठ-हविर्भिर्यक्ष्ये । सर्वपृष्ठसम्बन्धिहविः व्रीहिमया पुरोडाशाः व्रीहि-मयाश्चरव आमिक्षा च पञ्च प्रयाजाः ॥

For सर्व्वपृष्ठेष्टि see C.S. 636 and 637.

756.

3497. **दिग्विजयेष्टिपद्धतिः ।** *Digvijayeṣṭipaddhati.*

Substance, country-made paper. 9½×4¼ inches. Folia, 4. Lines, 12 on a page. Extent in ślokas, 100. Character, Nāgara of the nineteenth century. Appearance, discoloured. Complete.

It begins :—श्रीगणेशाय नमः ।

अमावास्यायां पौर्णमास्यां वापूर्य्यमाणपक्षे देवनक्षत्रे वा दिग्वि-जयेष्टिः कार्य्या । दिग्विजयेष्टिकामः पापनिर्णोदकामः सर्वदिक्षु पुण्यकीर्त्तिकामोऽन्नाद्यकामो वा श्रीपरमेश्वरप्रीत्यर्थं सर्व्वपृष्ठहवि-र्भिर्यक्ष्ये । ऋत्विग्वरणादिव्रतोपायनान्तशाखाहरणादिसप्तदश-सामिधेन्यः । १७ । शुक्लपक्षे सायं दोहमन्त्रेषूहः एता आचरन्ति रा इह वो मित्रावरुणावानुष्टुभावेकविंशवैराजौ शारदौ रमयतां गावः । कामधु० हि मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्यां वैराजाभ्यां शारदाभ्यां हविरिन्द्रियम् ।

It ends in the third line of 4B.

यज्ञो बभूव यज्ञग्रष्वमवर्जं (?)। ब्राह्मणतर्पणादिमिष्टिः सन्तिष्ठते ।

Then 8 lines and a half more beginning with सर्वपृष्ठेष्टि-आध्वर्युप्रयोगः । अग्नये गायत्राय त्रिवृतो राथन्तराय वासन्तायाष्टकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय वार्षताय etc., etc.

757.

1030. पवित्रेष्टिः । *Pavitreṣṭi.*

Substance, country-made paper. 10¼ × 3½ inches. Folia, 3. Lines, 10 on a page. Extent in ślokas, 80. Character, Nāgara. Appearance, old and worn out. Complete.

An anonymous manual for the performance of the Pavitra rite intended to exempt one from curse and sin. It follows the ritual of Baudhāyana and quotes the authority of Gopāla.

Beginning:—

अथ पवित्रेष्टिः सा च संवत्सरविप्रवासे प्रायश्चित्तार्थं कार्य्येति गोपाल आह ।

वत्सरातिप्रवासे तु पवित्रेष्टिस्तयोर्भवतीति बौधायनः । अभिशप्तः अभिशप्यमानो वा पापक्षयकामो वा पवित्रेष्ट्या यजेत । सा च उत्तरायणशुक्लपक्षे कृत्तिकादिविशाखान्तेषु नक्षत्रेषु शुद्धिकामेन तु पर्व्वणोः शुक्लपक्षे यस्यां कस्यांचित्तिथौ पूर्व्वोक्तनक्षत्रयुक्तायां कार्य्या । इत्यादि ।

End:—ततो गृहपतिनामादिब्राह्मणतर्पणान्तं समानम् ॥

Col.:—इति पवित्रेष्टिः ।

758.

10440. नक्षत्रेष्टि । *Nakṣattreṣṭi.*

Substance, country-made paper. 10¾ × 4¾ inches. Folia, 15. Lines, 11—13 on a page. Extent in ślokas, 750. Character, Nāgara of the nineteenth century. Appearance, discoloured. Complete.

A Ṛgvedi priest's manual for the performance of the Iṣṭis.

Beginning :—श्रीगणेशाय नमः ॥ अथ नक्षत्रेष्टिः ॥

नमः प्रवक्त्र इत्यादि सप्तदश सा[मि]धेन्यः ॥ शोचिष्केशस्तमी महीं ३ स्वारुहा यस्य श्रियो दृशेरयि वीरवतो यथा ॥ अग्ने यज्ञस्य चेततो ३ मंदाभ्यः पुर एताग्निर्विशां मानुषीणां ॥ तुणीरथः सदानवो ३ समिद्धो अग्न इत्यादि ॥ आवाहने ॥ अग्निमग्न आवह ॥ सोममा३ वह ॥ अग्निमा३ वह ॥ अग्निं कृत्तिका आ३ वह ॥ अनुमतिमावह ॥ देवां आज्यपामित्यादि ॥ उत्तमे प्रयाजे ॥ ये३ यजामहे स्वाहाग्निं स्वाहा सोमं स्वाहाग्निं स्वाहाकृत्तिका स्वाहानुमतिं स्वाहा देवा इत्यादि ॥ पुष्टिमंतावाज्यभागौ ॥ अग्निना रयिमश्नवद् गयस्फानो अमी वहेति ॥ आयु[ः]कामकर्तृक-प्रयोगे तु जीवातुमंतावाज्यभागौ ॥ आनो अग्ने सुचेतुनारयिं विश्वायुपोषसं ॥ माडीकंधे जीवसों ३ त्वं सोममहे भगत्वं युन ऋतायते ॥ दक्षं दधासि जीवसो नित्येयाज्ये ॥ प्रधानानां ॥ अग्निर्मूर्द्धा ० ॥ भुवो यज्ञस्य इत्यग्नेः ॥ अग्निर्नः पातु कृत्तिका-नक्षत्रं देवामिन्द्रियं ॥ इदमासां विचक्षणं हविराजसंजुहोतनो ३ ये ३ यजामहेऽग्निं कृत्तिका यस्य भान्ति रश्मयो यस्य केतवो यस्येमा विश्वा भुवनानि सर्व्वा ॥ स कृत्तिकाभिरभिसंवसानो-ऽग्निर्नो देवः सुविते दधातु ३ वौ ३ षट् । वागोजः सर्व्वंच ॥ अनुनोद्यानुमतिर्यज्ञं देवेषु मन्यतां ॥ अग्निश्च हव्यवाहनो भवना-दाशुषेमयो ३ ॥ ये ३ यजामहेऽनुमतिमन्विदनुमते त्वं मन्यासै शं च नः कृधि ॥ क्रत्वे दक्षायनोहिनु प्रण आयूंषि तारिषा वौ३ षट् ॥ अथ स्विष्टभः ॥ हव्यवाहमभिमाभिषाहं रक्षोहणं पृतनासु जिष्णुं ॥ ज्योतिष्मंतं दीद्यतं पुरंधिमग्निं स्विष्टकृतमाहुवेमों ३ ॥ ये ३ यजामहेऽग्निं स्विष्टकृतमयाजग्निरग्नेः प्रियाधामान्ययाट् सोमस्य प्रिया धामान्ययाडग्नेः प्रिया धामान्ययाडग्नेः कृत्तिकानां प्रिया धामान्ययाडनुमत्याः प्रियाधामान्ययाट् देवानां ० हविः स्विष्टमग्ने अभि तत् पृणाहि विश्वा देव पृतना अभिष्य ॥ उरु नः पंथां प्रदिशंन्विभाहि ज्योतिष्मद्देह्यजरं न आयू ३ वौं०. सूक्तवाके ॥ अग्निरिदं० सोम इदं० अग्निरिदं० अग्निः कृत्तिका इदं हविरजु-

षता० इति ॥ अनुमतिरिदं इति ॥ देवा आज्यपा इत्यादिसंस्था-
जपान्तं प्रकृतिवत् ॥ इतिकृत्तिकेष्टिः ॥

अथ रोहिणी नमः प्रवत्ता इत्यादि सप्तदशसामिधेन्यः ॥

2B, इति रोहिणीष्टिः ; 3A, इति मृगशिरेष्टिः ; इत्यार्द्रेष्टिः ;
3B, इति पुनर्वसू इष्टिः ॥ ५ ॥ ; 4A, इति पुष्येष्टिः ६ ॥ 4B,
इत्यश्लेषेष्टिः ॥ सप्तमः ॥ अथ मघेष्टिः ; 5A, इति पूर्व्वेष्टिः ; 5B,
इत्युत्तराफाल्गुनीष्टिः १० ; इति हस्तेष्टिः ११ ; 6A, इति चित्रेष्टिः
१२ ॥ ; 6B, इति स्वातीष्टिः १३ ; 7A, इति विशाखेष्टिः १४ —
अथ पौर्णमासीष्टिः ; 7B, इत्यनुराधेष्टिः १६ ; 8A, इति ज्येष्ठा-
नक्षत्रेष्टिः १७ ; इति मूलानक्षत्रेष्टिः १८ ; 8B, इति पूर्व्वा-
षाढ़ा इष्टिः १९ ; 9A, इत्युत्तराषाढ़ेष्टिः २० ; इत्यभिजि-
देष्टिः २१ ; 9B, इति श्रवणेष्टिः २२ ; 10A, इति श्रविष्ठेष्टिः ॥
२३ ; 10B, इति शतभिषत्रेष्टिः २४ ; 11A, इति प्रोष्ठपदेष्टिः
२५ ; 11B, इत्युत्तराप्रोष्ठपदेष्टिः २६ — अथ पूष्यानक्षत्रेष्टिः ;
12A, इति रेवतीनक्षत्रेष्टिः २७ ; 12B, इत्यश्विनीनक्षत्रेष्टिः
२८ ; 13A. इति भरणीष्टिः २९ ; इत्यमावास्येष्टिः ३० ; इति
चन्द्रमसेष्टिः ३१ ; 13B, इत्यहोरात्रेष्टिः ३२ ; इत्युषसेष्टिः ३३ ;
14A, इति नक्षत्रेष्टिः ३४ ; 14A, इति सूर्य्यनक्षत्रेष्टिः ३५ ;
इत्यदितेष्टिः ; 17A (end) इति वैश्वेष्टिः ॥ अथ (?) नक्ष-
त्रेष्टि होत्रः समाप्तः ॥

This is put in here as the Nakṣatreṣṭi's belong exclusively to Baudhāyana. Here they have a Ṛgvedi treatment.

759.

2051. स्वर्गद्वारेष्टिसत्रप्रयोगः । (बौधायनीयः)

Svaragdvāreṣṭisattraprayoga.

By Ḍhunḍhirāja, son of Rāma, son of Jamadagni.

Substance, country-made paper. 8¼ × 4½ inches. Folia, 14. Lines, 8—10 on a page. Extent in ślokas, 240. Character, Nāgar. Date, Śaka 1659. Appearance, discoloured. Complete.

It begins :—

प्रणम्य रामं जमदग्निसूनुं गुरुं गणेशं गिरिजां गिरिशं ।
तनोति सत्रस्य विधेः प्रयोगं गुरोः प्रसादादिह ढुण्ढिराजः ॥

सूत्रं बौधायनीये चातुर्होत्रीये प्राग् दीक्षणीयायाः दिवः श्येनी-रनुवित्ती सप्तान्वहं निर्वपति पञ्चापाद्या अनुवित्तीश्च। केवलं स्वर्गानु-कामो वा दिवश्यनीरभिन्वहं स्वर्गकामोयजेतापाद्याभिश्च ता ब्राह्मण-व्याख्याता। अन्यत्रापि ता ब्राह्मणे व्याख्याताः।

आपस्तम्बोऽपि सञ्चिते अग्नौ सप्तैतानि हवींष्यहं निर्वपति (?) यथा ब्राह्मणचोदितानि पञ्चोत्तराणि च तत्तत्कामे यथाकामी भवतीति विज्ञायत इति। ता इष्टयः सायनाचार्य्यैरपि ब्राह्मण-तृतीयकाण्डभाष्ये निरूपिताः। तत्र सप्त दिवःश्येनयोऽनुवित्तयो नाम पञ्च अपाद्या अनुवित्तयोर्नाम स्वर्गस्य लोकस्य द्वारः। तासां रक्षाकर्त्ताग्र आग्नादयो देवताः।

It ends :—

आग्नादिदेवताप्रीत्या सत्याग्नादि भवेदिह ।
कामचारो भवेदन्ते स्वर्गद्वार्षु च सप्तसु ॥
अपाद्यानाञ्च पञ्चानां पृथक् सत्रं करोति यः ।
तस्य स्युस्तप-आदीनि सत्यानि द्वार्षु पञ्चसु ॥
स्वर्ल्लोक कामचारोन्त इत्यूचुर्वेदवेदिनः ।

Date of composition of the work = 1626 Śaka = 1704 A.D.

अब्धिद्विषट्कुयुक् शाके चित्रभान्वन्तिमे सिते ।
अकरोत्पद्धतिं ढुण्ढिः स्वर्गद्वारेष्टिसिद्धिदाम् ॥

Colophon :—

इति बौधायनसूत्रानुसारि स्वर्गद्वारेष्टिसत्रप्रयोगः समाप्तः।

Post Colophon :—

शके १६५६ पिङ्गलनामसंवत्सरे श्रावणवद्य २ तद्दिने भागवतोप-नाम्ना यज्ञेश्वरेण लिखितं। स्वार्थं परार्थञ्च।

760.

1908. **ऐकाह्निकचातुर्म्मास्यप्रयोगः ।** *Aikāhikacāturmāsya-prayoga.*

Substance, country-made paper. 8½ × 4 inches. Folia, 9. Lines, 10 on a page. Extent in ślokas, 160. Character, Nāgara. Date, Śaka 1715. Appearance, discoloured. Complete.

For the work see L. 1556. The Ekāhas are treated of in Pr. XVIII of the Baudhāyana.

Colophon :—

बौधायनीयकल्पोक्त-चातुर्म्मास्य-निरूपणम् ।
ऐकाह्निकेन विधिनाऽकारीह हरितुष्टये ॥

Post Col. :—

शुभमस्तु । परशुरामार्पणमस्तु ॥ श्रीः । शके १७१५ प्रमादिनाम संवत्सरे वैशाखमासे कृष्णपक्षे तिथौ १२ सौम्यवासरे तद्दिने समाप्तम् ।

In a later hand :—

भागवतोपनाम्नो मोरेश्वरदीक्षितस्येदं पुस्तकम् ।

It begins :—

अथ बौधायनीयकल्पमवलम्ब्यैकाह्निकचातुर्म्मास्यं प्रकाश्यते फाल्गुन्यादिपौर्णमासीनां साम्वत्सरिके प्रयोगे सूत्रोक्तानां मध्ये कस्यामपि पौर्णमास्यां वारुणप्रघासिकं पैटकं च विहारं युगपत् सम्पाद्य समारोपादिविधिनोदवसाय कृतं वपनादिः पश्चाद् गार्हपत्यस्य पत्न्या सह दर्भेष्वासीनो दर्भान् धारयमाणःप्राणानायम्य देशकालौ संकीर्त्त्य याः पुरस्तादित्यादिनिविष्टमित्यन्तं जपित्वा श्रीपरमेश्वरप्रीत्यर्थं ऐकाह्निकैरैष्टिकचातुर्म्मास्यैर्यक्ष्ये इति चिरूपांशु त्रिरुच्चैर्वदेत् । ॐ तथेत्यन्ते ऐकाह्निकेष्टिकचातुर्म्मास्यसम्बन्धि हविः ॥ इत्यादि ।

761.

739. *The Same.*

For the manuscript see L. 1556.

This is a mere fragment of a comprehensive work on Prayogas.

762.

6288. **ऐकाह्निकचातुर्म्मास्यप्रयोगः ।** *Aikāhikacāturmāsya-prayoga.*

By Śukla Dikṣita.

Substance, country-made paper. 10 × 3½ inches. Folia, 4. Lines, 13 on a page. Extent in ślokas, 200. Character, Nāgara of the early nineteenth century. Appearance, old and discoloured. Complete.

Colophon :—

इति श्रीमच्छुक्लदीक्षितीयचातुर्म्मास्यप्रयोगे ऐकाह्निकप्रयोग-मातो[?]पन्यासः ।

The following statement was added by a different, later hand. It was purchased in S. 1860.

खखस्वागेन्दु तुल्ये च वैजनाथेन मौनिना ।
मूल्यं दत्त्वा गृहीतोऽयं संवत् प्रं ददतु स्फुटम् ॥

In a modern hand :—

बालमुकुन्दस्येदं ।

Beginning :—

अथैकाह्निकचातुर्मास्यप्रयोगः । फाल्गुन्यादिपर्व्वणां मध्ये कस्मि-न्नप्येकपर्व्वणि वारुणप्रघासिकं विहारं संपाद्य + + + गार्हपत्यं दर्भेष्वासीनो दर्भान् धारयमाणः प्राणानायम्य देशकालौ संकीर्त्य ऐकाह्निकैरैष्टिकचातुर्म्मास्यैर्यक्ष्ये अद्यत्यं मे॰ संकल्प्य ... ... etc., etc., etc.

A Śukla Dīkṣita has commented upon Āpastamba on Prāyaścitta (see Supra). This is put in Baudhāyana along

with other works about ऐकाह्निकचातुर्मास्य, which seems to be peculiar to that sage.

763.

2637. **ऐकाह्निकचातुर्म्मास्यप्रयोगः ।** *Aikāhikacāturmāsya-prayoga.*

For the manuscript and the work see L. 3211.

The scribe's name.

इदं पुस्तकं परमनरसिंभट्टात्मज विश्वनाथेन लिखितम् ।

764.

1923. **पशुबन्धाग्निप्रयोगः ।** *Paśubandhāgniprayoga.*

For the MS. and the work see L. 4253.

On offerings in sacrificial fires in animal sacrifices, according to the school of Baudhāyana.

Colophons:—

5B, इति सावित्राग्नेः प्रयोगः; 6B, इति नाचिकेताग्नेः प्रयोगः समाप्तः, अथ चातुर्होत्रप्रयोगो वक्ष्यते; 11B, इति समस्तस्याग्नेः प्रयोगः; 12A, इति वैश्वसृजः, अथ अरुणकेतस्याग्नेः प्रयोग उच्यते. The last section breaks off abruptly.

Rājendralāla names the treatise साविश्याग्निप्रयोग, which forms only its first section.

It refers to the 19th praśna of Baudhāyana.

765.

18 [illegible]: **बौधायनीयः ।** *Agniprayoga according to Baudhāyana.*

By Agnicit Viṣṇuvṛddha.

See L. No. 775, where the same MS. is noticed and also IO. No. 437. Both the MSS. are incomplete.

It is stated in L. 775 to be anonymous. But the very

opening verse quoted there gives the name of the author as विष्णुरुद्रान्वयोऽग्निचित्". That is, अग्निचिद् विष्णुरुद्र. The word अन्वय is found sometimes to be used in the sense of name.

766.

2211. **काठकाग्निचयनक्रमः ।** *Kāṭhakāgnicayanakrama.*

For the MS. and the work see L. No. 4128.

It was composed in Śaka 1782 by Vāpu Bhaṭṭa of Phanasī Grāma, the son of Mahādeva Kelakāra, a Citpāvana Brāhmaṇa.

Post Colophon :—

यादृशं पुस्तकं दृष्ट्वा etc.

भग्नपृष्ठकटिग्रीव etc.

संवत् १८८८ मीषौ ? वदि १ प्रतीपदा पुस्तकं समाप्तं लिखि० ऊलासीरामब्रह्म० ।

Rajendralal takes Kāṭhaka fire to be cremation fire. But the author says they were seen or discovered by the Muni Kaṭha, they are:—Sāvītrā Nāciketa, Cāturhotra, Vaiśvasṛja, Āruṇaketana, Svādhyāya and Brahmaṇa. From the previous MS. it is known that many of these fires are used in animal sacrifices. The author bases the treatise on Baudhāyana, Keśava Svāmī and Sāyana.

767.

17. **रुद्रपद्धति ।** *Rudrapaddhati.*

By Nārāyaṇa Bhaṭṭa, son of Rāmeśvara Bhaṭṭa.

Substance, country-made paper. 9½×4 inches. Folia, 43. Lines, 9 on a page. Extent in ślokas, 1010. Character, Nāgara. Date, Saṃ. 1798. Appearance, tolerable. Complete.

See L. 187.

Composed at Kāśī.

Post Col. Statement :—

यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥
श्रीरामो जयति । संवत् १७६८ समये आश्विनशुक्लाषष्ठ्यां रवौ
स्वार्थपरोपकारार्थं लिखितोऽयं ग्रन्थः । संख्या,—
परकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥
श्रीलक्ष्मीनारायणो जयति । ग्रन्थसंख्या १०१० । श्रीरुद्रो जयति ।

In a different hand—

इदं महारुद्रपुस्तकं मौन्योपकनामवैद्यनाथेन मौल्यं दत्ता गृहीतं ।

The authorities quoted (1) बौधायन p. 3A, 4B, (2) शातातप p. 3A, 4B, (3) शारदातिलक 11A, स्कन्दपुराण 26A, 28B.

768.

2024 *The Same.*

Substance, country-made paper. 10¼×4¼ inches. Folia, 36. Lines, 11 on a page. Extent in Ślokas, 1050. Character, Nāgara of the 18th century. Appearance, discoloured. Complete.

Colophon :—रामेश्वरभट्टात्मजनारायणसूरिणा काश्यां कर्मठसज्जनतुष्ट्यै
रुद्रानुष्ठानपद्धतिः ।
ग्रन्थाननेकानालोच्य रचितः सदसच्च यः ।
कृतश्रमस्तेन विभुः शङ्करः प्रीयतां मम ॥
इति श्रीरामेश्वरभट्टसुत-नारायणभट्टकृता रुद्रपद्धतिः समाप्ता ।

The author is a Ṛgvedi Brahman. But all rules for the sacrifices to Rudra are to be found only in Baudhāyana. So the Ṛgvedis have recourse to Baudhāyana for Rudra.

Post Col. :—भागवत इत्युपनामकमोरेश्वरदीक्षितः सुतस्य नारायणदीक्षित
भागवतदीक्षित टोकेकर ।

Then commences a small treatise on Rudrajapādyārambha Kāla.

After what is quoted in L. 187 we have :—

स्मार्त्तरुद्रप्रयोगस्य बौधायनसूत्रमूलकत्वेन बह्वृचादीनां च "तत्र बौधायनं ग्राह्यं बह्वृचादिभिरादरात्" इति वाक्यानुसारेण बौधायनानुसारानुरोधित्वादिति अन्यत्र चैतद् विस्तरेण निर्णीतं । तत्र रुद्रः पञ्चधा ; रूपं, रुद्रो, लघुरुद्रो, महारुद्रो ऽतिरुद्रश्चेति एकादशगुणवृद्ध्या सर्व्वत्र त्रेधा जपरुद्रो होमरुद्रोऽभिषेकरुद्रश्चेति ॥ जपरुद्रो द्वेधा केवलजपात्मकः होमाङ्गकश्चेति । होमाभिषेकयोस्तु केवलतदात्मकत्वमेव ।

769.

6209. रुद्रपद्धतिः । *Rudrapaddhati.*

Substance, country-made paper. $8\frac{1}{2} \times 4$ inches. Folia, 270. Lines, 9 per page. Extent in ślokas, 3200. Character, Nāgara. Date, Śaka 1669. Appearance, discoloured. Complete. Dated Śaka 1669.

Beginning :—श्रीगणेशाय नमः ।

यदा यदा हि धर्म्मस्येत्यादि शास्त्रप्रमाणतः ।
मत्तातपादरूपेण (मतातपातरूपेण) जातो यस्तं हरिं भजे ॥ १

The object of the work.

साधूनां सुखबोधाय तन्यते रुद्रपद्धतिः ।
ग्रन्थानालोच्य बहुधा क्रियते संग्रहो यतः ॥ २
स्वकल्पितत्वशङ्कात्र न कार्य्या पण्डितैरतः ॥ ॐ

It goes on

तत्र तावदिह च रुद्रानुष्ठाने त्रैवर्णिकानामेवाधिकारो न स्त्रीशूद्रानुपनीतानां । तेषां वैदिकमन्त्रयुक्तकर्म्मण्यध्ययनाद्यभावेन साक्षादचनाभावेऽनधिकारादिति । अन्यत्र चैतत् विस्तरेण निर्णीतो महारुद्रः पञ्चधा रूपं १ रुद्री २ लघुरुद्रः ३ महारुद्रः ४ अतिरुद्रश्चेति ५ ॥ एकादशगुणवृद्ध्या ज्ञातव्यः । तत्र त्रिविधा (?) जपरुद्रो होमरुद्रोऽभिषेकरुद्रश्चेति । जपरुद्रोऽपि द्वेधा केवलजपात्मको होमाङ्गश्चेति— होमाभिषेकयोस्तु केवलं तदात्मकत्वमेव ।

No colophon.

Post Colophon :— शके १६६९ प्रभवनामसंवत्सरे माघे शुद्ध १ दा तद्दिने इदं पुस्तकं माहादेव चिचोरेकरस्य सुतेन काशीनाथभट्टेन लिखितं शुभं भवतु ।

770.

5996. रुद्रस्नानपद्धतिः । *Rudrasnānapaddhati.*

By Rāmakṛṣṇa, son of Nārāyāṇa Bhaṭṭa

Substance, country-made paper. 9¼ × 4½ inches. Folia, 6. Lines, 12 on a page. Extent in ślokas, 120. Character, Nāgara. Date, Samvat 1777. Appearance, fresh. Complete.

Beginning :—श्रीगणेशाय नमः ।

अथ विरुद्धपदार्थोपसंहारेण रुद्रकलसस्नानविधिः ।

उदयनादौ गुरुशुक्रास्तादिरहिते शुद्धे मासे शुक्ले पक्षे ऋतौ विशेषेण चतुर्थ्यह्नि अष्टम्यां चतुर्दश्यां वा रविवासरे वा शुभनक्षत्रे चन्द्रताराद्यानुकूल्ये तत् कर्त्तव्यम् ।

The end :—

इति श्रीमद्रामेश्वरभट्टसुतनारायणभट्ट[सुतरामेश्वरभट्ट]कृता रुद्रकलसस्नानपद्धतिः ।

भट्टरामेश्वरसुत-भट्टनारायणात्मजः ।

रामकृष्णः समाचक्रे श्रीरुद्रस्नानपद्धतिम् ॥

Post Colophon Statement :—

संवत् १७७७ समये क्रोधिनामसंवत्सरे फाल्गुनशुद्धपञ्चम्यां भानुवासरे समाप्तम् ।

यज्ञेश्वरलोप्येन लिखितम् । शुभं भवतु ॥ चतुःषष्टिसद्धाय । श्रीरामार्पणमस्तु ।

771.

2725. रुद्रानुष्ठानम् । *Rudrānuṣṭhāna.*

Substance, country-made paper. 10¼ × 5 inches. Folia, 32. Lines, 12 on a page. Character, Nāgara. Appearance, discoloured. Incomplete.

It is a disquisition on Rudra Ritual.

It begins :—

अथ रुद्रानुष्ठानम् ।

अथातः प्रतकर्मीयं जुहोतीत्यादिकया नमस्ते रुद्रमन्यव इत्यन्तया श्रुत्या विहिते प्रतकर्मीयहोमे विनियुक्तस्य नमस्तेरुद्रमन्यव

इत्यादिकस्य जंभे दधामीत्यन्तस्य रुद्राध्यायस्यैव स्मृतिसूत्रपुराणस्थ-रुद्रविधानेषु रुद्रत्वप्रतिपादनाद्रुद्रपदवाच्यतया तस्यैव प्रसिद्धत्वाच्च। एतेन ऋग्वेदशाखयोः शाकलवाष्कलयोः शतरुद्रीयं रुद्रापरपर्य्याय-मस्तीति भ्रान्तिः केषांचिन्निरस्ता। यदि ऋग्वेदशाखयोः शत-रुद्रीयत्वमस्ति तर्हि सौ ऋग्वेदीयशतरुद्रीयानुष्ठानस्य कर्त्तव्यत्वेन ऋग्वेदिकरुद्रानुष्ठानपद्धतिनिबन्धनस्यैव उचितत्वात् कथमृग्वेदि-[भि]रपि नारायणभट्टादिभिर्याजुर्वैदिकरुद्रानुष्ठानपद्धतिर्निबद्धा।

अथ यजुर्वेदिन उद्दिश्येति चेत्तर्हि यद्यप्यनेकासु यजुःशाखासु रुद्रः पठ्यते तथापि तैत्तिरीयशाखानुसारेण रुद्रप्रयोग उच्यते। स्मार्त्तरुद्रप्रयोगस्य बौधायनसूत्रमूलकत्वेन बह्वृचादीनां च "तत्र बौधायनं ग्राह्यम्। बह्वृचादिभिरादरादि"ति वाक्यानुसारेण बौधा-यनीयानुष्ठेयत्वादित्युक्तग्रन्थविरोधः। अद्यावधि ऋग्वेदिभिः शिष्टै-रनुष्ठीयमानयाजुर्वैदिकरुद्रजपाद्यनुष्ठानस्यासङ्गतत्वापत्तिश्च तस्मात् ऋग्वेदशाखयोः शाकलवाष्कलयोः शतरुद्रीया यस्याःपर्य्यायो रुद्रो नास्त्येव। यत्तु सांख्यायनगृह्ये वृषोत्सर्गे रुद्रान् जपित्वेति सूत्रं तद्गतशेषं विधाय रुद्रं जपित्वेति, पौष्णस्य जुहोति रुद्रान् जपित्वेति वृषोत्सर्गे बौधायनपारस्करगृह्याद्येकवाक्यतया यजुर्वेदसमाम्नात-रुद्रजपविधायकम्।

772.

2710. रुद्रन्यासः। *Rudranyāsa.*

Substance, country-made paper. 9½ × 4½ inches. Folia, 20. Lines, 7 on a page. Extent in ślokas, 240. Character, Nāgara. Appearance, discoloured. Complete.

It begins:—

श्रीगणेशाय नमः॥ हरिरोम्।

अथातः पञ्चाङ्गरुद्राणां न्यासपूर्व्वकं जपहोमार्चनाभिषेकविधिं व्याख्यास्यामः।

या ते रुद्र शिवा तनूरघोरा ऽपापकाशिनी।

शिखायै नमः॥ ॐ अस्मिन्महत्यर्णवेऽन्तरीक्षे भवा अधि॥ तेषां शिरसे स्वाहा इत्यादि॥

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्र प्रचोदयात् । ईशानः सर्व्वविद्यानामीश्वरः सर्व्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवोमेऽस्तु सदाशिव ॐ । उत्तरतस्खण्डीश्वराय नमः । निर्म्माल्यं विसृज्य ॐ नमो भगवते रुद्राय ।

श्रीरामजीस् दासाय ।

772A.

8611. *The Same.*

Here called वेदोक्तशिवार्च्चनपद्धति ।

Country-made paper. 9×5 inches. Lines, 3 on a page. Character, Nāgara of the nineteenth century. Incomplete.

Beg. :—अथ वेदोक्तशिवार्च्चनपद्धतिः । तत्र प्रथममात्मविन्यासः । या ते रुद्र शिवातनूरघोरा, etc., etc. इति शिखायाम् ।

773.

3295.

Substance, country-made paper. 10×4⅓ inches. Folia, 9. Lines, 10, 12 on a page. Extent in ślokas, 250. Character, Nāgara of the early eighteenth century. Appearance, discoloured. Complete.

The object of the treatise :—

अथातः पञ्चाङ्गरुद्रन्यासपूर्व्वकं जपहोमार्च्चनाभिषेकविधिं व्याख्यास्यामः ।

याते रुद्रशिवातनूरघोरा, etc.

774.

3118. रुद्रन्यासः । *Rudranyāsa.*

Substance, country-made paper. 9×5 inches. Folia, 14. Lines, 13, 14 on a page. Extent in ślokas, 420. Character, Nāgara of the nineteenth century. Appearance, discoloured. Incomplete.

It begins:—

श्रीगणेशाय नमः । श्रीमहादेवाय नमः ।

प्रश्च मे इत्यनुवाकः । अस्य रुद्रस्य प्रश्नस्य अनुष्टुपछन्दस्य अघोर ऋषिः संकर्षणमूर्त्तिस्वरूपो योसावादित्यः परपुरुषः स एष रुद्रो देवता अग्निक्रतुचरमायामिष्टिकायां शतरुद्रीयजपे विनियोगः । सकलस्य रुद्राध्यायस्य श्रीरुद्रो देवता एका गायत्रीच्छन्दः

तिस्रोऽनुष्टुभस्तिस्रः पंक्तयः सप्तानुष्टुभो द्वे जगत्यौ परमेष्ठी ऋषिः परमात्मा देवता देवी गायत्रीच्छन्दः श्रीभवानीशङ्करप्रीत्यर्थे जपे विनियोगः ॥ अवदानधर्म्मः १७१ । अथातः पञ्चाङ्गरुद्राणां न्यासपूर्व्वकं जपहोमार्चनविधिं व्याख्यास्यामः । या ते रुद्रशिवातनूरघोरा पापकाशिनी । etc.

3B, इति प्रथमन्यासः ; 4A, इति द्वितीयन्यासः ; 4B, अथ ध्यानम् ; 8B, नमकं २८ चमकं २९ ;

13B, अथातो रुद्रस्नानार्चनाभिषेकविधिं व्याख्यास्यामः ।

The MS. contains a manual for the worship of *Rudra*, based on the Rudrādhyāya or the fifth prapāṭhaka, and anuvākas 1—10, and the beginning of the seventh prapāṭhaka of the fourth kāṇḍa of the Taittirīya Saṃhitā. The worship of Rudra includes Nyāsa, Japa, *Homa* and Snāna. While on the last topic, the MS. comes abruptly to an end.

775.

2709. *The Same.*

Substance, country-made paper. $8\frac{1}{2} \times 4$ inches. Folia, 17. Lines, 7 on a page. Extent in ślokas, 230. Character, Nāgara. Appearance, discoloured. Complete.

It ends :—

मन्त्रपुष्पाञ्जलि ॥ आवाहन० ॥ यस्य स्मृत्या० ॥ अपराध० ॥ अनेन मत्कृतपूजनेन भगवान् श्रीभवानीशङ्करमहारुद्रः प्रीयताम् । अग्निर्वायुः सूर्यश्चन्द्रमा दिश आपः पृथिव्यौषधिवनस्पतयः इन्द्रः पर्ज्जन्य ईशान आत्मा पुनर्मे त्रयोदश ॥ उत्तरन्यासः सुषारथि० ॥ हृदयाय० ॥ यज्ञेन० ॥ शिरसे० ॥ ह्रीश्वते० ॥ शिखायै० ॥ यत्रगणाः० ॥ कवचाः० ॥ देवास्त्रि० ॥ अस्त्राय फट् ॥ श्रीः ॥

There is no colophon.

776.

1699. **रुद्रपद्धतिः** । *Rudrapaddhati.*

By Harihara, son of Bhānubhaṭṭa.

Substance, country-made paper. $9\frac{1}{4} \times 3\frac{3}{4}$ inches. Folia, 31 of which 9—19 leaves are missing. Lines, 11, 12 on a page. Extent in ślokas, 800. Character, Nagar. Appearance, very old. Incomplete.

The Colophon —

इति श्रीभानुभट्टात्मजहरिहरकृता रुद्रपद्धतिः समाप्ताः।

There is an extra leaf in this MS. numbered **7** which ends with the colophon:—

इति रुद्रानुष्ठानदीपिकायां कर्म्मारम्भकालनिरूपणम्।

It begins:—

नत्वा विनायकं देवं सर्व्वविघ्नहरं प्रभुम्।

हरिहरेण विप्रार्थे क्रियते रुद्रपद्धतिः॥

आग्नेयकाण्डे सर्व्वा इष्टकाचितीः समाप्य पञ्चमे रुद्राध्याये चित्याग्नौ होमः श्रूयते चरमायामिष्टकायां जुहोतीति।

It ends:—ततस्तेषां मन्त्राशिषो गृहीत्वा तान् सानुनयं विसर्ज्य ब्राह्मणान् भोजयित्वा दीनानाथांश्च अन्नादिना संतोष्य सुहृन्मित्रादियुतो सोत्साहः सन्तुष्टः हविष्यं भुञ्जीत।

सुतेन भानुभट्टस्य हरिहरेण धीमता।

ग्रन्थाननेकानालोच्य कृतेयं रुद्रपद्धतिः॥

Authorities consulted:—

व्यास, शातातप।

This manual follows Baudhāyana's School, as appears from the following:—

21B, इति बौधायनोक्तविधिना प्रधानपूजां विधाय शिवानुज्ञां लब्ध्वा स्कान्द-पुराणोक्तरुद्रयन्त्रदेवतापूजां कुर्य्यात्॥

777.

3149. अतिरुद्रपद्धतिः। *Atirudrapaddhati.*

Substance, country-made paper. $7\frac{1}{4} \times 4$ inches. Folia, 9 to 30. Lines, 8 on a page. Character, Nāgara. Date, Saṃvat 1786. Appearance, old and discoloured. Incomplete in the beginning.

Colophon:—अतिरुद्रपद्धतिः समाप्ता।

The Post Colophon Statement:—

शुभं भवतु कल्याणमस्तु ग्रन्थसंख्या ६०० संवत् १७८६ वर्षे मीती आश्विन शुद्ध १२ दिने श्रीवाराणसीमध्ये ख्यातग्रीना (?) पठनार्थम्।

It ends :—अग्नेर्विसर्जनम् ।

गच्छ त्वं भगवन्नग्ने स्वस्थाने कुण्डमध्यतः ।

हव्यमादाय देवेभ्यः शीघ्रं देहि प्रसीद मे ॥

उपहारजातं तुभ्यमहं सम्प्रददे ॥

778.

3150. **महारुद्रपद्धतिः ।** *Mahārudrapaddhati.*

Substance, country-made paper. 7¼×4 inches. Folia, 76. Lines, 8 on a page. Extent in ślokas, 694. Character, Nāgara. Date, Saṃvat 1784. Appearance, discoloured. Complete.

In Saṃkalpa we get the date of the compilation of the work.

20A & B, नृप विक्रमार्कराजाभिषेकसमयातीत स च (?) सप्तदशशतानि चतुःषष्ठ्याधिकतमेऽब्दे प्रवर्त्तमाने तदन्तर्गतशालिवाहनशके षोड़शनवविंशति-संख्याके etc., etc., etc., Samvat 1764 and Śaka 1619.

Colophon :—

इति षोड़शस्तम्भदेवतानां पूजनं समाप्तम् ।

Post Colophon :—

संवत् १७८४ वर्षे मिति कार्त्तिकवद्य १ मा + दिने श्रीवारा-णसीमध्ये ख्यातखीना (?) शुभं भवतु ॥ ग्रन्थसंख्या २२५ ॥ (?)

779.

6551. **षोड़शावरणमहारुद्रार्चनपद्धतिः ।**

Soḍasāvaraṇa Mahārudrārcanāpaddhati.

By Kāśinātha Bhaṭṭa.

Substance, country-made paper. 11½×4½ inches. Folia, 7. Lines, 9 on a page. Extent in ślokas, 160. Character, modern Nāgara. Appearance, fresh. Complete.

Colophon :—इति भड़ोपनामक काशीनाथकृता षोड़शावरणमहारुद्रा-र्चनपद्धतिः समाप्ता ।

Beginning :—श्रीमहागणपतये नमः । श्रीदक्षिणामूर्त्तिगुरुभ्यो० ।

आचम्य प्राणानायम्य मम श्रीमहारुद्रप्रीत्यर्थं षोड़शावरणपूजां करिष्ये ।

780.

6518. रुद्रार्चनामञ्जरी। *Rudrārcanāmañjarī.*

By Mālaji Vedāṅgarāya, son of Tyagala Bhaṭṭa, son of Raṇṇa Bhaṭṭa of Sristhalagrāma in Gurjara.

Substance, country-made paper. 12×5 inches. Folia, 55. Lines, 10 on a page. Extent in ślokas, 1600. Character, Nagara of the eighteenth century. Appearance, discoloured, mouse eaten and repaired. Complete.

The Maṅgalācaraṇa, the names of the author and the work:—

नत्वा विघ्नविनाशनाय च गुरुं विघ्नेशपादाम्बुजं
हृत्पद्मान्तरनित्यवर्तिजडतानाशाय विद्याप्रदम्।
विप्राणामुपकारकाय तिगलाभट्टात्मजो मालजी-
नामाहं प्रकरोमि पद्धतिमिमां रुद्रार्चनामञ्जरीम्॥

Then it goes on—

पूर्व्वं तावज्ज्योतिर्विदुक्तरुद्रानुष्ठानयोग्यं समयं निश्चित्य अनन्तरं धर्म्मानुष्ठानयोग्यं तीर्थतडागारामनदीतीरादिदेशं विचिन्त्य उक्तस्थलाभावे गृहस्योत्तरे देशे पूर्व्वदेशे वा भूमिशोधनादि विधाय मण्डपादि रचयेत्॥

Colophons:—

17A, इति श्रीत्यगलात्मजेन वेदाङ्गरायोपनाम्ना मालजिना विरचितायां रुद्रपद्धतौ मातृकान्यासान्तो विधिः; 43B, इति भट्टश्रीत्यगलात्मजः० रुद्रमञ्जर्य्यां जपप्रशंसतो विधिः; 53B, इति भट्टश्रीत्यगलात्मजेन वे ... ... lost in repairing;

Last Colophon:—

इति विद्वन्मुकुटमाणिक्यभट्टश्रीरणात्मजभट्टश्रीत्यगलसूनुना मालजिना वेदाङ्गरायोपनाम्ना कृतेयं महारुद्रपद्धतिः सम्पूर्णा।

At the end, it gives an account of the author's family:—

आसीद् गुर्ज्जरमण्डले क्षितितलालङ्कारभूते पुरे
स्वच्छे श्रीस्थलसंज्ञके गुणनिधिः श्रीभट्टरणाभिधः।

तज्ज्ञः श्रीत्रिगलाह्वयः प्रवरधीस्तस्यात्मजो मालजी

सोऽयं पद्धतिमाकरोन्निगमविद्देदाङ्गरायः सुधीः ॥

781.

7877. **एकरुद्रजपविधानम् ।** *Ekarudrajapavidhāna.*

Substance, country-made paper. 9×4½ inches. Folia, 11 of which the 7th is missing. Lines, 10 on a page. Extent in ślokas, 320. Character, Nagar. Date, Saṃvat 1638. Appearance, old and discoloured. Complete.

Colophon :—

इति एकरुद्रजपविधानं समाप्तम्

Post Col. :—

शुभं भवतु ॥ संवत् १६३८ वर्षे श्रावणवदि ८ लिखितं त्रवाड़ी गोपीनाथपरमानन्देन लिखितम् ॥

Beginning :—

